ग्रन्थालय
परिग्रहण संख्या
Accession no. ...............
वर्गांक
Coll No. ...............

श्रीः

महाकवि रइधूकृत

# भद्रबाहु-चाणक्य-चन्द्रगुप्त-कथानक एवं राजा कल्कि-वर्णन

[अद्यावधि अज्ञात एवं अप्रकाशित हस्त प्रति का सर्वप्रथम सम्पादन-अनुवाद एवं समीक्षात्मक अध्ययन तथा आवश्यक टिप्पणियों, परिशिष्टों, आवश्यक सन्दर्भों एवं शब्दकोष सहित]

सम्पादन एवं अनुवाद
डॉ. राजाराम जैन एम.ए., पी-एच.डी. शास्त्राचार्य
[बी.नि.भा. पुरस्कार एवं स्वर्णपदक प्राप्त]
रीडर एवं अध्यक्ष-संस्कृत-प्राकृत विभाग
ह.दा. जैन कालेज, आरा
सम्मान्य निदेशक
डी.के.जैन ओरियण्टल रिसर्च इंस्टीटयूट
आरा [बिहार]

प्रकाशक
श्री दिगम्बर जैन युवक संघ

द्वितीय संस्करण 1992 मूल्य 25/-

विहरन् गतियोगेन शिष्याणां पञ्चभिः शतैः।
वनवासं परिप्राप्य दक्षिणापथसंभवम् ॥७४॥

ततः पश्चिमदिग्भागे महाक्रौञ्चपुरस्य सः ।
चाणक्यो गोकुलस्थाने कायोत्सर्गेण तस्थिवान्॥७५॥

बभूव तत्पुरे राजा सुमित्रो नाम विश्रुतः ।
तत्प्रिया रूपसंपन्ना विनयोपपदा मतिः ॥७६॥

मन्त्री सुबन्धुनामास्य नन्दस्य मरणेन सः ।
चाणक्योपरि संक्रुध्य तस्थौ तच्छिद्रवाञ्छया ॥७७॥

ततः क्रौञ्चपुरेशस्य महासामन्तसेविनः ।
सुबन्धुर्बन्धुसंपन्नः समीपे तस्य तस्थिवान् ॥७८॥

अथ क्रौञ्चपुराधीशः श्रुत्वा मुनिसमागमम् ।
महाविभूतिसंयुक्तस्तं यतिं वन्दितुं ययौ ॥७९॥

चाणक्यादिमुनीन् नत्वा स तत्पूजां विधाय च।
महाविनयसंपन्नो विवेश निजपत्तनम् ॥८०॥

ततोऽस्तमनवेलायां यतीनां शुद्धचेतसाम् ।
साग्निं करीषमाधाय तत्समीपेऽपि रोषतः ॥८१॥

विधाय स्वेन देहेन पापराशेरुपार्जनम् ।
महाक्रोधपरीताङ्गः सुबन्धुर्नरकं ययौ ॥८२॥

चाणक्याख्यो मुनिस्तत्र शिष्यपञ्चशतैः सह ।
पादोपगमनं कृत्वा शुक्लध्यानमुपेयिवान् ॥८३॥

उपसर्ग सहित्वेमं सुबन्धुविहितं तदा ।
समाधिमरणं प्राप्य चाणक्यः सिद्धिमीयिवान् ॥८४॥

ततः पश्चिमदिग्भागे दिव्यक्रौञ्चपुरस्य सा ।
निषधका मुनेरस्य वन्द्यतेऽद्यापि साधुभिः ॥८५।

[हरिषेणाचार्यकृत बृहत्कथाकोष (१०वीं सदी) से]
कथानक सं. १४३ ]

♣

परिशिष्टः ३

## उपवासफलवर्णनं अर्थात् भद्रबाहु-चाणक्य-चन्द्रगुप्त-कथा

अत्रैवार्यखण्डे पुण्ड्रवर्धनदेशे कोटिकनगरे राजा पद्मधरो राज्ञी पद्मश्रीः पुरोहितः सोमशर्मा ब्राह्मणी सोमश्रीः। तस्याः पुत्रोऽभूत्तदुत्पत्तिलग्नं विशोध्य सोमशर्मा वसतौ ध्वजमुद्धावितवान् मत्पुत्रो जिनदर्शनमान्यो भविष्यतीति। ततस्तं भद्रबाहुनाम्ना वर्धयितुं लग्नः, सप्तवर्षानन्तरं मौञ्जीबन्धनं कृत्वा वेदमध्यापयितुं च। एकदा भद्रबाहुर्बटुकैः सह नगराद्बहिर्बटुक्रीडार्थं ययौ। तत्र वट्टस्योपरि वट्टधारणे केनचित् द्वौ, केनचित् त्रय उपर्युपरि धृताः। भद्रबाहुना त्रयोदश धृताः। तदवसरे जम्बूस्वामिमोक्षगतेरनन्तरं विष्णु-नन्दिमित्र-अपराजित-गोवर्धन-भद्रबाहुनामानः पञ्च श्रुतकेवलिनो भविष्यन्तीति जिनागमसूत्रं चतुर्थः केवली गोवर्धननामानेकसहस्रयतिभिर्विहरंस्तत्रागत्य तं लुलोके। सोऽष्टाङ्गनिमित्तं वेत्ति। तं विलोक्यायं पश्चिमश्रुतकेवली भविष्यतीति बुबुधे। तत्समुदायालोकनात्सर्वे बटुकाः पलायिताः। स आगत्य गोवर्धनं ननाम। मुनिना पृष्टस्त्वं किमाख्यः, कस्य पुत्र इति। सोऽवदत् पुरोहितसोमशर्मणः पुत्रोऽहं भद्रबाहुनामा। पुनर्मुनिनोक्तं मत्समीपेऽध्येष्यसे। तेन ओमिति भणिते तद्धस्तं धृत्वा स एव तत्पितुः गृहं ययौ। तं विलोक्य सोमशर्मासनादुत्थाय संमुखमागत्य मुकुलितकर आसनमदादपृच्छच्च-स्वामिन्, किमित्यागमनम्। मुनिर्बभाण तव पुत्रोऽयं मत्समीपेऽध्येष्ये इत्युक्तवान्। त्वं भणसि चेदध्यापयिष्यामि। द्विजोऽब्रूतायं जैन-दर्शनोपकारक एव स्यादित्युत्पन्नमुहूर्तगुणो विद्यते, सोऽन्यथा किं भवेदयं भवद्भ्यो दत्तो यज्ञानन्ति तत्कुर्वन्त्विति तेन समर्पितः। तदा माता यतिपादयोर्लग्नाऽस्य दीक्षां मा प्रयच्छन्तु। मुनिरुवाचाध्याप्य तवान्तिकं प्रस्थापयामीति श्रद्धेहि भगिनि। ततस्तं नीत्वा मुनिर्ग्रासावासादिना श्रावकैः समाधानं कारयित्वा सकलशास्त्राण्यध्यापितवान्। स च सकलदर्शनानां सारासारतां विबुध्य दीक्षां ययाचे। गुरुरवोचत् स्वं नगरं गत्वा तत्र पाण्डित्यं प्रकाश्य मातापितरावभ्युपगमय्यागच्छेतिविससर्ज। स च गत्वा मातापितरौ प्रणम्य तदग्रे गुरोर्गुणप्रशंसां चकार। द्वितीय दिने पद्मधरराजस्य भवनद्वारे पत्रमवलम्ब्य द्विजादिवादिनः सर्वान् जिगाय, तत्र जैनमतं प्रकाश्य मातापितरावभ्युपगमय्य गत्वा दीक्षितः। श्रुतकेवलीभूतमाचार्य कृत्वा गोवर्धनः संन्यासेन दिवं गतः। भद्रबाहुस्वामी स्वामिभक्तः तपस्वियुक्तो विहरन् स्थितः।

तत्रान्या कथा। तथाहि - पाटलिपुत्रनगरे राजा नन्दो बन्धुख्य-सुबन्धुका-विशकटालाख्यचतुर्भिमन्त्रिभिः राज्यं कुर्वन् तस्थौ । एकदा नन्दस्योपरि प्रत्यन्तवासिनः संभूयागत्य देशसीम्नि तस्थुः। शकटालेन नृपो विज्ञप्तः- प्रत्यन्त-वासिनः समागताः, किं क्रियते। नन्दोऽब्रूत त्वमेवात्र दक्षस्त्वद्भणितं करोमि। शकटालोऽवोचच्छत्रवो बहवो दानेनोपशान्तिं नेयाः, युद्धस्यानवसर इति। राज्ञोक्तं त्वत्कृतमेव प्रमाणम् द्रव्यं प्रयच्छ। ततः शकटालो द्रव्यं दत्त्वा तान् व्याघोटितवान्। अन्यदा राजा भाण्डागारं द्रष्टुमियाय। द्रव्यमपश्यन् क्व गतं द्रव्यमित्यपृच्छत्। भाण्डागारिकोऽब्रूत शकटालोऽरिभ्योऽदत्त। ततः कुपितेन राज्ञा सकुटुम्बः शकटालो भूमिगृहे निक्षिप्तः। सरावप्रवेशमात्रद्वारेण स्तोकमोदनं जलं प्रतिदिनं दापयति नरेशः। तमोदनं जलं च दृष्टा शकटालोऽब्रूत कुटुम्बमध्ये यो नन्दवंशं निर्वंशं कर्तुं शक्नोति स इममोदनं जलं च पिबति। स एव स्थितोऽन्ये मृताः।

इतः पुनः प्रत्यन्तवासिनां बाधायां नन्दः शकटालं सस्मार उक्तवांश्च शकटालवंशे कोऽपि विद्यत इति। कश्चिदाहान्नं जलं च कोऽपि गृह्णाति। ततस्तमाकृष्य परिधानं दत्त्वा उक्तवानरीनुपशान्तिं नयेति। स केनाप्युपायेनोपशान्तिं निनाय। राज्ञा मन्त्रिपदं गृहाणेत्युक्ते शकटालस्तदुल्लङ्घ्य सत्कारगृहाध्यक्षतां जग्राह। एकदा पुरबाह्येऽटन् दर्भसूचीं खनन्तं चाणक्यद्विजं लुलोके। तदनु तमभिवन्द्योक्तवान् किं करोषि । चाणक्योऽब्रूत द्विद्वेऽहमनया, ततो निर्मूलमुन्मूल्य शोषयित्वा दग्ध्वा प्रवाहयिष्यामि। शकटालोऽमन्यत अयं नन्दनाशे समर्थ इति तं प्रार्थयति स्म त्वयाग्रासने प्रतिदिनं भोक्तव्यमिति। तेनाभ्युपगतम्। ततः शकटालो महादरेण तं भोजयति। एकदाऽध्यक्षस्तस्य स्थानचलनं चकार। चाणक्योऽवदत् स्थानचलनं किमिति विहितम्। अध्यक्ष उवाच राज्ञो नियमोऽयमग्रासनमन्यस्मै दातव्यमिति। ततो मध्यमासनेऽपि भोक्तुं लग्नः। ततोऽप्यन्ते उपवेशितः। स तत्रापि भुङ्क्ते, कोपं न करोति। अन्यदा भोक्तुं प्रविशन् चाणक्योऽध्यक्षेण निवारिको राज्ञा तव भोजनं निषिद्धमहं किं करोमि। ततश्चाणक्यः कुपितः पुरान्निःसरन्नवदद्यो नन्दराज्यार्थी स मत्पृष्ठं लगतु। ततश्चन्द्रगुप्ताख्यः क्षत्रियोऽतिनिस्वः किं नष्टमिति लग्नः। स प्रत्यन्तवासिनां मिलित्वोपायेन नन्दं निर्मूलयित्वा चन्द्रगुप्तं राजानं चकार। स राज्यं विधाय स्वापत्यबिन्दुसाराय स्वपदं दत्त्वा चाणक्येन दीक्षितः। चाणक्यभट्टारकस्य इत ऊर्ध्वं भिन्ना कथाराधनायां ज्ञातव्या। बिन्दुसारोऽपि स्वतनयाशोकाय स्वपदं वितीर्य दीक्षितः। अशोकस्यापत्यं कुनालोऽजनि। स बालः पठन् यदा तस्थौ तदाशोकःप्रत्यन्तवासिनां उपरि जगाम। पुरे व्यवस्थितप्रधानान्तिकं राजादेशं प्रास्थापयत्।



कथम्। उपाध्यायाय शालिकूरं च मसिं च दत्त्वा कुमारमध्या पयतामिति। स च वाचकेनान्यथा वाचितः। ततः उपाध्यायं शालिकूरं मसिं च भोजयित्वा कुमारस्य लोचने उत्पाटिते। अरीन् जित्वा आगतो नृपः कुमारं वीक्ष्यातिशोकं चकार। दिनान्तरैस्तं चन्द्राननाख्यया कन्यया परिणायितवान्। तदपत्यं संप्रति-चन्द्रगुप्तोऽभूत्। तं राज्ये निधायाशोको दीक्षितः। संप्रतिचन्द्रगुप्तो राज्यं कुर्वन् तस्थौ।

एकदा तदुद्यानं कश्चिदवधिबोधमुनिरागतो वनपालात्तदागतिं ज्ञात्वा संप्रति-चन्द्रगुप्तो वन्दितुं ययौ। वन्दित्वोपविश्य धर्मश्रु तेरनन्तरं स्वातीतभवान् पृष्टवान्। मुनिः कथयति।.... तं निशम्य संप्रति-चन्द्रगुप्तो जहर्ष। तं नत्वा पुरं विवेश सुखेन तस्थौ।

एकस्या रात्रेः पश्चिमयामे षोडश स्वप्नान् ददर्श। कथम्। रवेरस्तमनम् १, कल्पद्रुमशाखाभङ्गम् २, आगच्छतो विमानस्य व्याघुटनम् ३, द्वादशशीर्ष सर्पम् ४, चन्द्रमण्डलभेदम् ५, कृष्णगजयुद्धम् ६, खद्योतम् ७, शुष्कमध्यप्रदेशतडागम् ८, धूमं ९, सिंहासनस्योपरि मर्कटम् १०, स्वर्णभाजने क्षैरीयीं भुञ्जानं श्वानम् ११, गजस्योपरि मर्कटम् १२, कचारमध्ये कमलम् १३, मर्यादोल्लंघितमुदधिम् १४, तरुणवृषभैर्युक्तं रथम् १५, तरुणवृषभारूढान् क्षत्रियांश्च १६, ततोऽपरदिनेऽनेकदेशान् परिभ्रमन् संघेन सह भद्रबाहुः स्वामी आगत्य तत्पुरं चर्यार्थं प्रविष्टः श्रावकगृहे सर्वर्षीन् दत्त्वा स्वयमेकस्मिन् गृहे तस्थौ। तत्रात्यव्यक्तो बालोऽवदत् 'वोलह वोलह' इति। आचार्योऽपृच्छत् केती वरिस इति। बालो 'बारा वरिस' इत्यब्रूत। ततो अलाभेन सूरिरुद्यानं ययौ। संप्रति-चन्द्रगुप्तस्तदागमनं विज्ञाय सपरिजनो वन्दितुं ययौ। वन्दित्वा स्वप्नफलमप्राक्षीत्। मुनिरब्रवीत् अग्रे दुःखमकालवर्तनं त्वया स्वप्ने दृष्टम्। तथाहि दिनपत्यस्तमनं सकलवस्तुप्रकाशकपरमागमस्यास्तमनं सूचयति १। सुरद्रुमशाखाभङ्गोऽद्यास्तमन (?) प्रभृतिक्षत्रियाणां राज्यं विहाय तपोऽभावं बोधयति २। आगच्छतो विमानस्य व्याघुटनम् अद्यप्रभृत्यत्र सुरचारणादीनाम् आगमनाभावं ब्रूते३। द्वादशशीर्षः सर्पो द्वादशवर्षाणि दुर्भिक्षं वदति ४। चन्द्रमण्डलभेदो जैनदर्शने संघादिभेदं निरूपयति।५। कृष्णगजयुद्धमितोऽत्राभिलषितवृष्टेरभावं गमयति ६। खद्योतः परमागमस्योपदेशमात्रावस्थानं निगदति ७। मध्यम-प्रदेशशुष्कतडागमार्यखण्डमध्यदेशे धर्मविनाशमाचष्टे ८। धूमो दुर्जनादीनामाधिक्यं भणति ९। सिंहासनस्थो मर्कटोऽकुलीनस्य राज्यं प्रकाशयति १०। सुवर्णभाजने पायसं भुञ्जानः श्वा राजसभायां कुलिङ्गपूज्यतां द्योतयति ११। गजस्योपरि स्थितो मर्कटो राजपुत्राणामकुलीनसेवां बोधयति १२। कचारस्थं कमलं रागादियुक्ते तपोविधानं मनयति १३। मर्यादाच्युतउदधिः षष्ठांशातिक्रमेण

राज्ञां सिद्धादायग्रहणमाविर्भावयति १४। तरुणवृषभयुक्तो रथो बालानां तपोविधानं वृद्धत्वे तपोऽतिचारं निश्चाययति १५। तरुणवृषभारूढाःक्षत्रियाः क्षत्रियाणां कुधर्मरतिं प्रत्याययन्ति १६।इति श्रुत्वा संप्रति-चन्द्रगुप्तः स्वपुत्रसिंहसेनाय राज्यं दत्त्वा निःक्रान्तः।

भद्रबाहुस्वामी तत्र गत्वा बालवृद्धयतीनाह्वाययति स्म, बभाषे च तान् प्रति-अहो यो यतिरत्र स्थास्यति तस्य भङ्गो भविष्यति इति निमित्तं वदति, तस्मात्सर्वैर्दक्षिणमागन्तव्यमिति। रामिल्लाचार्यः स्थूलभद्राचार्य स्थूलाचार्यस्त्रयोऽप्यतिसमर्थश्रावकवचनेन स्वसंघेन समं तस्थुः! श्रीभद्रबाहुर्द्वादशसहस्त्रयतिभिर्दक्षिणं चचाल, महाटव्यां स्वाध्यायं ग्रहीतुं निशिहियापूर्वकं कांचिद् गुहां विवेश। तत्रात्रैव निषद्येत्याकाशवाचं शुश्राव। ततो निजमल्पायुर्विबुध्य स्वशिष्यमेकादशाङ्गधारिणं विशाखाचार्यं संघाधारं कृत्वा तेन संघं विससर्ज । संप्रति चन्द्रगुप्तः प्रस्थाप्यमानोऽपि द्वादशवर्षाणि गुरुपादावाराधनीयावित्यागमश्रुतेर्न गतोऽन्ये गताः। स्वामी संन्यासं जग्राहाराधनामाराधयन् तस्थौ। संप्रतिचन्द्रगुप्तो मुनिरुपवासं कुर्वन् तत्र तस्थौ। तदा स्वामिना भणितो हे मुनेऽस्मद्दर्शने कान्तारचर्यामार्गोऽस्ति। ततस्त्वं कतिपयपादपान्तिकं चर्यार्थं याहि। गुरुवचन मनुल्लङ्घनीयमन्यत्रायुक्तादिति वचनाज्जगाम। तदा तच्चित्तपरीक्षणार्थं यक्षो स्वयमदृशीभूत्वा सुवर्णवलयालंकृतहस्तगृहीतचटुकेनसूपसर्पिरादिमिश्रं शाल्योदनं दर्शयति स्म। मुनिरस्य ग्रहणमयुक्तमित्यलाभे गतः। गुरोरन्ते प्रत्याख्यानं गृहीत्वा स्वरूपं निरूपितवान्। गुरुस्तत्पुण्यमाहात्म्यं विबुध्य भद्रं कृतम् इत्युवाच। अपरस्मिन् दिनेऽन्यत्र ययौ। तत्र रसवतीभाण्डानि हेममयं भाजनमुदनकलशादिकं ददर्श। अलाभेनागतो गुरोः स्वरूप निरूपितवान् । स च भद्रं भद्रमिति बभाण। अन्यस्मिन् दिनेऽन्यत्र ययौ। तत्रैकैव स्त्री स्थापयति स्म। तदा त्वमेकाहमेक इति जनापवादभयेन स्थातुमनुचितमिति भणित्वालाभे निर्जगाम। अन्येद्युरन्यत्राट। तत्र तत्कृतं नगरमपश्यत्। तत्रैकस्मिन् गृहे चर्या कृत्वागतो गुरोःस्वरूपं कथितवान्। स बभाण समीचीनं कृतम्। एवं स यथाभिलाषं तत्र चर्या कृत्वागत्य स्वामिनः शुश्रूषां कुर्वन् वसति स्म। स्वामी कतिपयदिनैर्दिवं गतः। तच्छरीरमुच्चैः प्रदेशे शिलायाम् उपरि निधाय तत्पादौ गुहाभित्तौ विलिख्याराधयन् वर्साते स्म। विशाखाचार्यादयश्चोलदेशे सुखेन तस्थुः। इतः पाटलिपुत्रे ये स्थिता रामिल्लादयस्तत्र महादुर्भिक्षं जातम् तथापि श्रावका ऋषिभ्योऽतिविशिष्टमन्नं ददति। एकदा चर्यां कृत्वागमनावसरे रङ्कैः कस्यचिदृषेरुदरं विपाटयोदनो भक्षितः। ऋषेरुपद्रवं वीक्ष्य



श्रावकैराचार्य भणिता ऋषयो रात्रौ पात्राणि गृहीत्वा गृहमागच्छन्तु, तान्यशनेन भृत्वा वयं प्रयच्छामो वसतौ निधाय योग्यकाले द्वारं दत्त्वा गवाक्षप्रकाशेन परस्परं हस्तनिक्षेपणं कृत्वा चर्यान कुर्वन्त्विति, तदभ्युपगम्य तथा प्रवर्तमाने सत्येकस्यां रात्रौ दीर्घकायं वेतालाकृतिं पिच्छकमण्डलुपाणिं कुक्कुरादिभयेन गृहीतदण्डं यतिं विलोक्य कस्याश्चिद् गर्भिण्याः भयेन गर्भपातोऽभूत्। तमनर्थं विलोक्योपासकैर्भणितं श्वेतं कम्बलं घटिकास्वरूपं लिङ्गं कटिप्रदेशं च झम्पितं यथा भवति तथा स्कन्धे निक्षिप्य गृहं गच्छन्त्वन्यथानर्थ इति। तदप्यभ्युपगतम्। तथा प्रवर्तमाना अर्धकर्पटितीर्थाभिधा जाताः। एवं ते सुखेन तथैव तस्थुः।

इतो द्वादशवर्षान्तरं दुर्भिक्षं गतमिदानीं विहरिष्याम इति विशाखाचार्याः पुनरुत्तरापथमागच्छन् गुरुनिषद्यावन्दनार्थं तां गुहामवापुः। तावत्तत्रातिष्ठद्यो गुरुपादावाराधयन् संप्रति-चन्द्रगुप्तो मुर्निद्वितीयलोचाभावे प्रलम्बमानजटाभारः संघस्य संमुखमाट ववन्दे संघम्। अत्रायं कन्दाद्याहारेण स्थित इति न केनापि प्रतिवन्दितः। संघो गुरोर्निषद्याक्रियां चक्रे उपवासं च। द्वितीयाह्ने पारणानिमित्तं कमपि ग्रामं गच्छन्नाचार्यः संप्रति-चन्द्रगुप्तेन निवारितः स्वामिन्, पारणां कृत्वा गन्तव्यमिति। समीपे ग्रामादेरभावात् क्व पारणा भविष्यतीति गणी बभाण। सा चिन्ता न कर्तव्येति संप्रति-चन्द्रगुप्त उवाच। ततो मध्याह्ने कौतुकेन संघस्तत्प्रदर्शितमार्गेण चर्यार्थं चचाल। पुरो नगरं लुलोके, विवेश, बहुभिः श्रावकैर्महोत्साहेन स्थापिता ऋषयः। सर्वेऽपि नैरन्तर्यानन्तरं गुहामाययुः। कश्चिद् ब्रह्मचारी तत्र कमण्डलुं विसस्मार। तामानेतुं ढुढौके। तन्नगरं न लुलोक इति विस्मयं जगाम, गवेषयन् झाडे तामपश्यत्।गृहीत्वागत्याचार्यस्य स्वरूपमकथयत्। ततः सूरिः संप्रति-चन्द्रगुप्तस्य पुण्येन तत्तदैव भवतीत्यवगम्य तं प्रशंसयामास। तस्य लोचं कृत्वा प्रायश्चित्तमदत्त, स्वयमप्यसंयतदत्तमाहारं भुक्तवानीति संघेन प्रायश्चितं जग्राह।

इतो दुर्भिक्षापसारे रामिल्लाचार्य स्थूलभद्राचार्यावालोचयामासतुः। स्थूलाचार्यो-ऽतिवृद्धः स्वयमालोचितवांस्तत्संघस्य कम्बलादिकं त्यक्तं न प्रतिभासत इति नालोचयति। पुनः पुनर्भणन्नाचार्यो रात्रावेकान्ते हतः। स्थूलाचार्यो दिवं गतः इति सर्वैः संभूय संस्कारितः। तद्दृषयस्तथैव तस्थुःतत्रागता विशाखाचार्यादयः प्रतिवन्दना न कुर्वन्तीति तदा तैः केवली भुङ्क्ते, स्त्रीनिर्वाणमस्तीत्यादि विभिन्नं मतं कृतम्। तैः पाठिता कस्यचिद्राज्ञः पुत्री स्वामिनी। सा सुराष्ट्र [ष्ट्र] देशे वलभीपुरेशवप्रपादाय दत्ता। सा तस्यातिवल्लभा जाता। तया स्वगुरवस्तत्रानायिताः। तेषामागमने राज्ञा सम्मर्धपथं ययौ। राजा तान् विलोक्योक्तवान्- देवि, त्वदीया गुरवः कीदृशा न परिपूर्ण परहिता नापि नग्नाः

इति। उभयप्रकारयो मध्ये कमपि प्रकारं स्वीकुर्वन्तु चेत्पुरं प्रविशन्तु, नोचेद्यान्त्वित्युक्ते तैः श्वेतः साटको वेष्टितस्ततः स्वामिनीसंज्ञया श्वेतपटा बभूवुः। स्वामिन्याः पुत्रो जक्खलदेवी श्वेतपटैः पाठिता। सा करहाटपुरेशभूपालस्यातिप्रिया जज्ञे। सापि स्वगुरून् स्वनिकटमानयामास। तेषामागतौ तया राजा विज्ञप्तो मदीया गुरवः समागताः त्वयार्धपथं निर्गन्तव्यमिति। तदुपरोधेन निर्गतो वटतले स्थितान् दण्डकम्बल युतानालोक्य भूपाल उवाच देवि, त्वदीया गुरवो गोपालवेषधारिणो यापनीया इति। राजा तानवज्ञाय पुरं विवेश। तेषां तयोक्तं भवादृशामत्र वर्तनं नास्तीति निर्ग्रन्थैः भवितव्यम्। ततस्ते स्वमतावलम्बेनैव जाल्पसंघाभिधानेन निर्ग्रन्थाजनिषपतेति। संप्रति-चन्द्रगुप्तोऽतिविशिष्टतपो विधाय संन्यासेन दिवं जगाम।

[श्री रामचन्द्र मुमुक्षुकृत पुण्याश्रवकथाकोष (१२वीं सदी के आसपास) से]
कथा सं. ३८

♣

१. धनाढ्येभ्यः ।

व – १